0NEQQ5

# सङ्कलनात्मकं मूल्याङ्कनम् – II (2016-17)

## संस्कृतम् – सम्प्रेषणात्मकम्

## कक्षा – नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् – **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् – **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् – **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् – **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क' अपठित-अवबोधनम् – ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

परिश्रमस्य महत्त्वं जीवने नितराम् अस्ति। परिश्रमेण एवं सर्वाणि कार्याणि पूर्णानि भवन्ति। उक्तं च "उद्यमेन हि सिद्धयन्ति कार्याणि न मनोरथैः" केवलं कल्पना-करणेन न किमपि कार्यं भवितुं शक्नोति। छात्रजीवने परिश्रमस्य महत्त्वं सर्वाधिकं वर्तते। यः छात्रः परिश्रमशीलः स्वाध्यायपरायणः च भवति, सः सदैव सफलतां लभते। सत्यमुक्तं केनचित् कविना 'प्रयत्नादयोग्याः सुयोग्याः भवन्ति" "प्रयत्नेन एव मूर्खाः विद्वांसः, भवन्ति।" अतः अस्माभिः आलस्यं प्रमादं च विहाय प्रयत्नो विधेयः। ये छात्राः परिश्रमेण पाठं पठन्ति स्मरन्ति च, ते सदा परीक्षायां सफलाः भवन्ति। सत्यमेव उक्तम् "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः"।

**I. एकपदेन उत्तरत।**

(i) छात्रजीवने कस्य महत्त्वम् सर्वाधिकं वर्तते।

(ii) कः सदैव सफलतां लभते?

**II. पूर्णवाक्येन उत्तरत।**

(i) अस्माभिः किं कर्त्तव्यम्?

(ii) के छात्राः परीक्षायां सफलाः भवन्ति?

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।**

(i) 'परिश्रमेण एव कार्याणि पूर्णानि भवन्ति' अत्र कर्तृपदं किम्।

(अ) परिश्रमेण (ब) कार्याणि

(स) पूर्णानि (द) एव

(ii) मूर्खाः इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) प्रयत्नः (ब) विद्वांसः

(स) लक्ष्मीः (द) उद्योगिनं

(iii) 'ते सफलाः भवन्ति' अत्र ते पदं कस्मै प्रयुक्तम्?

(अ) येभ्यः (ब) कार्येभ्यः

(स) जनेभ्यः (द) छात्रेभ्यः

(iv) 'त्यक्त्वा' इत्यर्थे अनुच्छेदे किम् पदं प्रयुक्तम्?

(अ) विधेयः (ब) प्रयत्नः

(स) विहाय (द) सुयोग्यः

**IV. अस्य अनुच्छेदस्य उचितम् शीर्षकं लिखत।**

## खण्डः 'ख' रचनात्मक-कार्यम् – (15 अङ्काः)

2 मञ्जूषायां प्रदत्तपदानां सहायतया शुल्कदण्डक्षमार्थं प्रधानाचार्याय लिखितं निम्नलिखितं प्रार्थनपत्रं पूरयत। 5

सेवायाम्

मान्याः (i) ..............................

क ख ग विद्यालयः

ए नगरम्

(ii) ..............................

सविनयम् निवेदनम् (iii) .............................. अद्य विज्ञानस्य (iv) .............................. एकम् उपकरणम् असावधानतया मया त्रुटितम्। तत् (v) .............................. पञ्चाशत्-रूप्यकदण्डेन (vi) ................ । मम पिता शुल्कप्रदाने असमर्थः (vii) ............... । कृपया मम (viii) .............................. क्षमापयित्वा (ix) .............................. कुर्वन्तु अत्रभवन्तः।

सधन्यवादम्

भवताम् (x) ..............................


अ ब स

नवमश्रेणीस्थः

तिथि : ..............................

**मञ्जूषा :** महोदयाः, आज्ञाकारी शिष्यः, प्रयोगशालायाम्, यत्, अधिकृत्य, अनुग्रहम्, शुल्कदण्डम्, दण्डितोऽस्मि, अस्ति, प्रधानाचार्याः।

3 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत।(2x5=10) 10



**मञ्जूषा**

गृहात्, बहिः, वृक्षः, ग्रामस्य, शुकाः, अपि, जनः, चिन्तामग्नः, लघुवाटिका, श्वेतवस्त्राणि, चिन्तयति।

**अथवा**

**'सरोवरस्य वर्णनम्'** इति विषयम् अधिकृत्य संस्कृतेन पञ्च वाक्यानि लिखत।(2x5=10) 10

**मञ्जूषा**–सरोवरः, कमलानि, भ्रमराः, वायुः, वृक्षाः, पुष्पाणि, हरितपत्राणि, विकसितानि, अर्धविकसितानि, पत्रेषु, गुञ्जन्ति, मौक्तिककवत्, सन्ति।

**खण्डः 'ग' अनुप्रयुक्त व्याकरणम् – ( 30 अङ्काः )**

4 **उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।** 6

(i) ..................... सफलतायै कठोरपरिश्रमं कृतम्।

(अ) भवान् (ब) भवता (स) भवती (द) भवते

(ii) प्रजायाः रक्षा एव ..................... कर्त्तव्यम् अस्ति।

(अ) राज्ञः (ब) राजा (स) रजानः (द) राज्ञि

(iii) ..................... निराकारः नित्यः च अस्ति।

(अ) आत्मा (ब) आत्मानः (स) आत्मनि (द) आत्मना

(iv) एते ..................... कुतः आगताः ?

(अ) विद्वान् (ब) विदुषः (स) विद्वांसौ (द) विद्वांसः

(v) हे ..................... ! जलपूर्णसरोवरे पक्षिणः स्वयम् आयान्ति।

(अ) राज्ञि (ब) राजन् (स) राज्ञः (द) राजा

(vi) ..................... बालकेषु अभिनवः श्रेष्ठः अस्ति।

(अ) गच्छन् (ब) गच्छताम् (स) गच्छन्तः (द) गच्छत्सु

5 **उचितसंख्यापदैः रिक्त स्थानानि पूरयत।** 6

(i) ................. कन्याः समाचारपत्राणि पठन्ति (त्रि)

| | | | |
|---|---|---|---|
| | | (ii) तस्य गृहस्य समीपे .................. वृक्षाः सन्ति (पञ्चन्)<br>(iii) इदम् जलपानम् .................... बालिकाभ्यः यच्छतु। (चतुर)<br>(iv) वृक्षे .................. वानराः वसन्ति। (त्रि)<br>(v) वीरः बालकः .................. खड्गेन एव क्रीडतु। (एक)<br>(vi) आकाशे ................. खगाः उत्पतन्ति। (चतुर्) | |
| | 6 | **प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत।**<br>(i) यूयं कस्यचित् धनं न .................... ।<br>(अ) हर (ब) हरताम्<br>(स) हरतम् (द) हरत<br>(ii) त्वं मा .................... ।<br>(अ) क्रुध्यतु (ब) क्रुध्यन्तु<br>(स) क्रुध्यताम् (द) क्रुध्य<br>(iii) हे छात्राः! यूयं सत्कार्याणि एव .................... ।<br>(अ) कुर्यात् (ब) कुर्युः<br>(स) कुर्याताम् (द) कुर्यात<br>(iv) हे लते! त्वं कदाचित् प्रतिकूलं न .................... ।<br>(अ) चिन्तयतु (ब) चिन्तयन्तु<br>(स) चिन्तय (द) चिन्तयताम्<br>(v) सर्वेभ्यः सर्वं .................... ।<br>(अ) रोचेत (ब) रोचयाताम्<br>(स) रोचेरन् (द) रोचेः<br>(vi) यूयं सर्वेषां कल्याणं .................... ।<br>(अ) इच्छेत् (ब) इच्छेतम्<br>(स) इच्छेः (द) इच्छेत | 6 |
| | 7 | **उचित–उपपदविभक्तीनां प्रयोगं रिक्तस्थानेषु कुरुत।**<br>(i) मनसितः एकाकी एव ................ प्रति धावति।<br>(अ) दुष्टः (ब) दुष्टम्<br>(स) दुष्टाय (द) दुष्टस्य<br>(ii) लक्ष्मणः ................ अलं वर्तते।<br>(अ) मेघनाथः (ब) मेघनाथाय<br>(स) मेघनाथेन (द) मेघनाथस्य<br>(iii) ................ परः कश्चिदपि न विद्यते।<br>(अ) श्यामः (ब) श्यामात्<br>(स) श्यामस्य (द) श्यामे | 6 |

| | | | |
|---|---|---|---|
| | | (iv) माता ................ स्निह्यति।<br>(अ) माम्  (ब) मम<br>(स) मह्यम्  (द) मयि<br>(v) ................ हीनः अपि ज्ञानवान् भवति।<br>(अ) धनम्  (ब) धनात्<br>(स) धनेन  (द) धानाय<br>(vi) ................ दक्षिणतः का अस्ति?<br>(अ) त्वया  (ब) तव<br>(स) त्वयि  (द) त्वम् | |
| | 8 | **अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br>(i) नरः ___________ न वदेत्। (खाद् + शतृ)<br>(अ) खादत्  (ब) खादिवान्<br>(स) खादन्  (द) खाद्यमानः<br>(ii) पिता द्विचक्रिकां ___________ । (आ + नी + क्तवतु)<br>(अ) आनीतवान्  (ब) आनीतः<br>(स) आनीतम्  (द) आनीतवती<br>(iii) मया पत्रं लिखितम्।<br>(अ) लिख् + क्त  (ब) लिख् + क्तवतु<br>(स) लिख् + शतृ  (द) लिख् + शानच्<br>(iv) मात्रा अनुमतः बालकः आपणं गतः।<br>(अ) अनु + मन् + शतृ  (ब) अनुमन् + शानच्<br>(स) अनुमत् + शतृ  (द) अनु + मन् + क्त<br>(v) पुरस्कारं ___________ बालिकाः परस्परं वदन्ति। (लभ् + शानच्)<br>(अ) लभन्त्यः  (ब) लभमानाः<br>(स) लभवानाः  (द) लभानाः<br>(vi) छात्रा विद्यालये पुस्तकं विना आगतवती।<br>(अ) आ + गम् + क्त  (ब) आ + गम् + शतृ<br>(स) आगत + शानच्  (द) आ + गम् + क्तवतु | 6 |
| | | **खण्ड : 'घ' पठित-अवबोधनम् – 35 अङ्काः** | |
| | 9 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि उत्तर-पुस्तिकायां लिखत।(2+1+2)**<br>हे मुने! भर्तृसेवायाः प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं मांसविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति त्वं च निरहंकारः भविष्यसि इति। एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां प्रणम्य तद्गृहात् निरगच्छत्।<br>I. एकपदेन उत्तरत।<br>(i) कस्याः प्रसादेन पतिव्रतायाः तादृशं विज्ञानम् आसीत्। | 5 |

(ii) मुनिः तां प्रति किं कृत्वा निरगच्छत् ?

II. पूर्णवाक्येन उत्तरत।

धर्मव्याधं गत्वा मुनिः किं भविष्यति ?

III. भाषिककार्यम् –

(i) ''ततस्ते श्रेयो भविष्यति''। अस्मिन् वाक्ये ''ते'' सर्वनामपदं कस्मै प्रयुक्तम् ?

(अ) कल्याणाय (ब) भर्तृसेवायै

(स) मुनये (द) विज्ञानाय

(ii) 'स मुनिः तां प्रणम्य तद् गृहात् निरगच्छत्' अत्र ''मुनिः'' कर्तृ-पदस्य अस्मिन् वाक्ये क्रियापदं किम्?

(अ) स (ब) निरगच्छत्

(स) प्रणम्य (द) गृहात्

10 **अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत।(2+1+2)** 5

वेदभाभासितं सत्कलालालितं
रम्यसङ्गीतसाहित्यसौहित्यभूः।
भारतीवल्लकीझङ्कृतैर्झङ्कृतं
भूतले भाति मेऽनारतं भारतम्।।

**I. एकपदेन उत्तरत।**

(i) भारतं काभिः लालितम् वर्तते ?

(ii) क्थं भासितं विद्यते भारतम् ?

**II. पूर्णवाक्येन उत्तरत।**

भारतं कैः झङ्कृतं वर्तते ?

**III. निर्देशानुसारम् उत्तरत –**

(i) 'सरस्वती' पदस्य अर्थे किं पदं श्लोके प्रयुक्तम् ?

(अ) भूः (ब) वल्लकी

(स) भारती (द) भाति

(ii) 'एकदा' इत्यस्य पदस्य कः विपर्ययः श्लोके आगतः ?

(अ) अनारतम् (ब) भाति

(स) भारतं (द) ललितम्

11 **अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –(2+1+2)** 5

**भोजः** अनुगृहीतोऽस्मि। कुतः समागमनम् अत्रभवताम्?

**लक्ष्मीधरः** राजन्। यत्र जलपूर्ण सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि।

**भोजः** ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर!

| | | | |
|---|---|---|---|
| | | नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं नि:सार्य तद्गृहे एष पण्डितवर:, वासयितव्य:।<br><br>I. एकपदेन उत्तरत।<br>(i) यत्र जलपूर्णं सर: भवति तत्र के समायान्ति?<br>(ii) लक्ष्मीधर: कस्य राज्ये निवस्तुम् इच्छति?<br>II. पूर्णवाक्येन उत्तरत।<br>भोज: लक्ष्मीधरविदुषे निवासव्यवस्थां कारयितुम् कं कथयति?<br>III. भाषिककार्यम्।<br>(i) 'विभूषयेयु:' इत्यस्य कर्तृपदं किम्?<br>(अ) परिषदम् (ब) भवादृशा: (स) भोज: (द) विद्वांस:<br>(ii) 'निवासं करणाय' इति अर्थे किं पद प्रयुक्तम्?<br>(अ) निवस्तुम् (ब) समाहूय (स) नि:सार्य (द) समाकर्ण्य | |
| | 12 | **अधोलिखितश्लोकयो: अन्वयं कुरुत –( ½ x 10 =5)**<br>**( क )** आम्र! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये।<br>हन्त! सम्प्रति तथापि जनानां छाययैव दलयस्यतितापम्।।<br>**अन्वय:** – आम्र! यद्यपि (i)............ दिवसा: (ii)............. ये पुष्पसौरभफलप्रचुरा: (आसन्) हन्त! (iii)............ सम्प्रति **(iv)**............ अतितापम् (v)............ एव दलयसि।<br>**( ख )** मूलं भुजङ्गै: शिखरं प्लवङ्गै: शाखा विहंगै: कुसुमानि भृङ्गै:।<br>नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरै: समन्तात्।<br>**अन्वय:** – (i)............ मूलम् (ii)............. शिखरम् (iii)............ शाखा:भृङ्गै: कुसुमानि (आश्रितानि) **(iv)**............ तत् न एव अस्ति यत् समन्तात् (v)............ न आश्रितम्। | 5 |
| | 13 | **रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।**<br>(i) जलमूलम् अन्विष्यता <u>स्वातिमुनिना</u> आह्लादकर: शब्द: श्रुत:।<br>(ii) अग्रे गत्वा पर्वतात् पतत: <u>जलबिन्दून्</u> अपश्यत् स:।<br>(iii) प्राचीना भारतीयविज्ञानपरम्परा <u>उत्कृष्टा</u> आसीत्।<br>(iv) मुनि: <u>तृषाकुलतां</u> विस्मृत्य वेगेन आश्रमम् आगतवान्।<br>(v) <u>भरतमुनिना</u> नाट्यशास्त्रं विरचितम्। | 5 |
| | 14 | **अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत।**(½ x 10 = 5)<br>(1) जनक: अष्टावक्रं हास्यकारणम् अपृच्छत्।<br>(2) हसत: विदुष: दृष्ट्वा अष्टावक्र: अपि उच्चै: अहसत्।<br>(3) जनक: तस्य ज्ञानम् दृष्ट्वा प्रभावित: अभवत्।<br>(4) अष्टावक्र: पण्डितै: सह शास्त्रार्थम् करोति।<br>(5) सर्वे विद्वांस: तस्य देहं दृष्ट्वा अहसन्।<br>(6) अत: अहम् एतान् दृष्ट्वा अहसम्। | 5 |

| | | | |
|---|---|---|---|
| | | (7) अष्टावक्रः जनकस्य सभां प्रविशति।<br>(8) एते विद्वांसः देहम् अपश्यन्, न तु आत्मानम्।<br>(9) राजा जनकः अष्टावक्रं स्वगुरुम् अमन्यत।<br>(10) अष्टावक्रः पण्डितान् अपृच्छत् – ''किम् वक्रे देहे आत्मा अपि वक्रः भवति?'' | |
| | 15 | **रेखाङ्कितशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।**<br>(i) एतद् <u>अवगत्य</u> प्रेरितः स वेगेन आश्रमम् आगतावन्।<br>(अ) गत्वा (ब) प्रत्यागतः (स) ज्ञात्वा<br>(ii) जलमूलम् <u>अन्विष्यता</u> तेन कश्चन शब्दः श्रुतः।<br>(अ) विशेषता (ब) नक्षत्र विज्ञाने (स) अन्वेषणं कुर्वता<br>(iii) प्रतिध्वनिविज्ञानं विना संगीत साधनानां निर्माणं <u>असाध्यं</u> वर्तते।<br>(अ) सहायकः (ब) असम्भवं (स) रुग्णं<br>(iv) गम्भीराध्ययनं कृत्वा अभूतपूर्वाः सिद्धयः <u>सम्प्राप्ताः</u>।<br>(अ) समापिताः (ब) लब्धाः (स) समीपे<br>(v) सप्तवर्षीयः सन् छात्रः पञ्चविद्याः <u>अधीतवान्</u>।<br>(अ) ध्यानेन (ब) अनुसृत्य (स) पठितवान् | 5 |
| | | | |
| | | -o0o0o0- | |